भगोविवस्वान् पूषा च सविता दशमः स्मृतः एकादश स्तथा त्वष्टा द्वादशोविष्णुरुच्यते" । कल्पभेदान्नामभेद इत्यविरोधः । तद्रूपम् ध्यानशब्दे वच्यते । "यथा नरोऽर्य्यमणोमरुतः कवन्धिनः" ऋ० ५.५४,८ । "अर्य्यमणे स्वाहेति तदेनमस्य सर्वस्यार्य्यमणं करोति शत०ब्रा० ।

**अर्य्यमिक** पु० अनुकम्पितः दत्तः अर्य्यमदत्तः अनुकम्पायाम् ठन् "शेवलसुपरिविशालवरुणार्य्यमादीनां तृतीयात्" पा० अन्त्यलोपः । अनुकम्पिते अर्य्यमदत्ते ।

**अर्य्यम्य** पु० अर्य्यमैव स्वार्थे वेदे यत् । सूर्य्ये "अर्य्यम्यं वरुणमित्रं वा सखायं वा सदमिद्भ्रातरं वा" ऋ०५,८५,७ ।

**अर्वन्** पु० ऋ—वनिप् । १घोटके, २इन्द्रे, ३गोकर्णपरिमाणे च । स्त्रियामर्वती सा च ४बड़वायां ५कुट्टिन्यामपि । अस्य सुभिन्ने त्रादेशः अर्वन्तौ अर्वतः । "श्लथीकृतप्रग्रह-मर्वतां व्रजाः" माघः सौ तु अर्वा इत्येव लोकएव त्रादेश इति भाष्यम् वेदे तु अर्वाणौ इत्येव । ४गमनशीले त्रि० स्त्रियां ङीप् वनोरश्च । अर्वरी ।

**अर्व्वाक** त्रि० अवरमकति गच्छति अक—वक्रगतौ अण् पृ०अवरस्यार्वादेशः । समीपे "यन्नासत्या पराके अर्वाके अस्ति भेषजम्" ऋ०८,६,१५ "अर्वाके समीपे" भा० ।

**अर्वाक्काल** पु० अर्वाक् अवरः कालः । अवरकाले तत्रभवः ठञ् न वृद्धिः अर्वाक्कालिकः अवरकालभवे त्रि० "तान्यर्वाक्कालितया निष्फलान्यन्टतानि च" मनुः ।

**अर्वाक्स्रोतस्** पु० अर्वाक् अधोगामि स्रोतोरेतोयस्य । ऊर्द्ध्वरेतोभिन्ने इन्द्रियप्रसक्ते ।

**अर्व्वाग्विल** पु०अर्वाक् बिलमस्य । चमसे । "अर्वाग्विलश्च-मस ऊर्द्ध्वबुध्नस्तस्मिन् यशोनिहितम्" । शत०ब्रा० ।

**अर्व्वाच्** अव्य० अवरे काले देशे वा अञ्चति अनच्-क्विन् पृषो० अर्वादेशः । १पश्चात्काले २मध्यकाले "अर्वाग्दश-भ्यो वर्षेभ्यः" भुज० ४तत्कालवर्त्तिनि त्रि० "ये केचि-दस्मादर्वाञ्चो लोकाः" छा०उ० । 'कथं वा दीयतामर्वाङ् मुनिता धर्म्मरोधिनी" किरा०स्त्रियां ङीप् अर्वाची "उर्म्मी-दर्व्वा "अर्वाचीश्च पराचीश्चोपदधाति" शत ब्रा० । ३विपर्य्यस्ते अर्वाच्+असि तस्य लुक् । ४अवरकालादौ ५मध्येच अव्य० । तत्रभवार्थे ट्युल् तुट् च अर्वाक्तनः । तद्भवे त्रि० स्त्रियां ङीप् । [गर्भे यस्य । पर्जन्ये मेघे ।

**अर्वाग्वसु** अर्वाक् अभ्यन्तरे अर्व्वाचीनं वसु दृष्टिहेतूदकं

**अर्वाचीन** त्रि० अर्वाग्भवः ख । अवरकालभवे । "अर्वाचीनं सुते मनो ग्रावा कृणोतु" ऋ०१,८४,३, "यदूर्द्ध्वं पृथिव्या अर्वाचीनमन्तरीक्षात्" शतब्रा० ।

**अर्व्वावत्** त्रि०,अवरकालोऽस्त्यस्य मतुप् पृ० अर्वादेशः दीर्घः मस्य वः । अर्वाचीने । "अर्वावतो ! न आगहि परावतश्च" ऋ०३,४०८, । "अर्वावतः अर्वाचीनान्" भा० ।

**अर्व्वावसु** पु० देवानां होतृविशेषे "इदमहमर्वावसोः सदने सीदामीति" अर्वावसुर्नाम देवानां होता तस्यैव सदने सीदति" शत०ब्रा० "अर्वाक् वसु धनमस्य पृयो" भा० ।

**अर्व्वुक** पु० अर्व-हिंसने बा० उकञ् । आटविके दक्षिणदेश स्थे नृपभेदे ते च सहदेवेन जिताः "सचीना अर्वुकाश्चैव राजानश्च महाध्वजाः । तांस्तानाटविकान् सर्व्वान् अजयत् पाण्डुनन्दनः" भा०स०प० सहदेवदिग्विजये ।

**अर्श** त्रि० ऋश+अच् । अश्लीले पापिष्ठे "अनर्शरातिशब्दे १५१ पृष्ठे उदा० । २अर्शोरोगे न० ।

**अर्शआदि** पु० अर्शआदिर्येषाम् । अस्त्यर्थे अच्प्रत्ययनिमित्त भूते 'अर्श आदिभ्योऽच्" पाणिन्युक्ते शब्दसमूहे । सच गणः अर्शस् उरस् तुन्द—चतुर पलित, जटा घाटा अघ, कर्द्दम अम्ल, लवण, (स्वाङ्गाद्धीनात्) (वर्णात्) आकृतिगणोऽयम् ।

**अर्श(र्स)स** न० ऋ—असुन् शुट् (सुट् दन्तादिरित्यन्ये) । बलिकाकारे गुह्यस्थरोगभेदे यथाह सुश्रुतः 'षड-र्शांसि भवन्ति वातपित्तकफशोणितसन्निपातैः सहजानि चेति ॥ तत्रानात्मवतां यथोक्तैः प्रकोपणैर्व्विरुद्धाध्यशन-स्त्रीप्रसङ्गोत्कटुकासनपृष्ठयानवेगविधारणादिभिर्व्विशेषैः प्रकुपिता दोषा एकशो द्विशः समस्ताः शोणितसहिता वा यथोक्तं प्रसृताः प्रधानधमनीरनुप्रपद्याऽधोगत्वा गुदमा-गस्य प्रदुष्य बलीर्म्मांसप्ररोहान् जनयन्ति विशेषतोमन्दा-ग्नेस्तथा तृणकाष्ठोपललोष्ट्रवस्त्रादिभिः शीतोदकसंस्पर्श-नाद्वा कन्दाः परिवृद्धिमासादयन्ति तान्यर्शांसीत्याचक्षते ॥ तत्र स्थूलान्त्रप्रतिबद्धमर्द्ध पञ्चाङ्गुलं गुदमाहुस्तस्मिन् बलय-स्तिस्रोऽध्यर्द्धाङ्गुलान्तरभूताः प्रवाहणी विसर्ज्जनी संवरणी चेति । चतुरङ्गुलायताः सर्वास्तिर्य्यगेकाङ्गुलोच्छ्रिताः॥ शङ्खा-वर्त्तनिभाश्चापि उपर्य्युपरि संस्थिताः । गजतालुनिभाश्चापि वर्णतः सम्प्रकीर्त्तिताः ॥ रोमान्तेभ्यो यवाध्यर्द्धं गुदौष्ठः परिकीर्त्तितः ॥ प्रथमा तु गुदौष्ठादङ्गुलमात्रे । तेषान्तु भविष्यतां पूर्व्वरूपाणि, अन्ने न श्रद्धा कृच्छ्रात्पक्तिरम्लीका सक्थिसदनमाटोपः कार्श्यमुद्गारबाहुल्यमक्ष्णोश्च श्वयथुरन्त्र-कूजनं गुदपरिकर्त्तनमाशङ्का पाण्डुरोगग्रहणी दोषशो-षाः कासश्वासौ भ्रमस्तन्द्रा निद्रेन्द्रियदौर्ब्बल्यञ्च । जाते-